--------- Click on the ---------
Download Link
To view the complete book

# परिशिष्टम्

## वर्णविचारः

### 1. वर्णाः

संस्कृते इदानीं 48 वर्णानां प्रयोगः भवति। ते मुख्यतया भागत्रयेण विभक्ताः सन्ति, 1-स्वराः 2-व्यञ्जनानि 3-अयोगवाहाश्चेति, यथा-

**स्वराः-13**

- **ह्रस्वस्वराः-5**: अ, इ, उ, ऋ, लृ
- **दीर्घस्वराः-8**: आ, ई, ऊ, ॠ, ए, ऐ, ओ, औ

**व्यञ्जनानि-33**

- **वर्गीयव्यञ्जनानि-25**
  - क्, ख्, ग्, घ्, ङ्,
  - च्, छ्, ज्, झ्, ञ्,
  - ट्, ठ्, ड्, ढ्, ण्,
  - त्, थ्, द्, ध्, न्,
  - प्, फ्, ब्, भ्, म्,
- **अवर्गीयव्यञ्जनानि-8**
  - **अन्तस्थाः-4**: य्, र्, ल्, व्,
  - **ऊष्माणः-4**: श्, ष्, स्, ह्,

**अयोगवाहौ-2**

- **अनुस्वारः**
- **विसर्गः**

© NCERT not to be republished

## 2. उच्चारणस्थानानि

वर्णाभिव्यक्तिप्रदेशः स्थानं कथ्यते। शब्दप्रयोगसमये कायाग्निना प्रेरितः वायुः कण्ठादिस्थानेषु सञ्चरन् वर्णान् अभिव्यनक्ति। यथोक्तं पाणिनीयशिक्षायाम्–

**आत्मा बुद्ध्या समेत्यर्थान् मनो युङ्क्ते विवक्षया।**
**मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥**
**मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम् ॥**
**अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।**
**जिह्वामूलं च दन्ताश्च नासिकौष्ठौ च तालु च ॥**

एवम् वर्णानाम् उच्चारणस्थानानि अष्टौ सन्ति। (*i*) उरः (*ii*) कण्ठः (*iii*) शिरः (*iv*) जिह्वामूलम् (*v*) दन्ताः (*vi*) नासिका (*vii*) ओष्ठौ (*viii*) तालुः। तद्यथा–

| वर्णाः | उत्पत्तिस्थानानि | वर्णानां संज्ञा |
|---|---|---|
| अ, आ, क्, ख्, ग्, घ्, ङ्, ह्, विसर्गः | कण्ठः | कण्ठ्यः |
| इ, ई, च्, छ्, ज्, झ्, ञ्, य्, श् | तालुः | तालव्यः |
| ऋ, ॠ, ट्, ठ्, ड्, ढ्, ण्, र्, ष् | मूर्धा | मूर्धन्यः |
| ऌ, त्, थ्, द्, ध्, न्, ल्, स् | दन्ताः | दन्त्यः |
| उ, ऊ, प्, फ्, ब्, भ्, म् | ओष्ठौ | ओष्ठ्यः |
| ङ्, ञ्, ण्, न्, म् | नासिका + कण्ठादीनि | नासिक्यः |
| ए, ऐ | कण्ठतालू | कण्ठतालव्यः |
| ओ, औ | कण्ठोष्ठम् | कण्ठोष्ठ्यः |
| व | दन्तोष्ठम् | दन्त्योष्ठ्यः |
| अनुस्वारः | नासिका | नासिक्यः |

© NCERT not to be republished

# कारकम्

## ( सामान्यपरिचयः )

सामान्यतः षट्कारकाणि भवन्ति। यथा–

**कर्त्ता कर्म च करणं सम्प्रदानं तथैव च।**
**अपादानाधिकरणम् इत्याहुः कारकाणि षट्॥**

| | | |
|---|---|---|
| (*i*) कर्त्तृकारकम् | (*ii*) कर्मकारकम् | (*iii*) करणकारकम् |
| (*iv*) सम्प्रदानकारकम् | (*v*) अपादानकारकम् | (*vi*) अधिकरणकारकम् |

**कर्त्तृकारकम्** – स्वतन्त्रः कर्त्ता। क्रियायां यः स्वतन्त्रः प्रधानो वा भवति सः कर्त्ता। यथा–रामः ग्रामं गच्छति। अत्र गमनक्रियायां रामः स्वतन्त्रः वर्तते, अतः सः कर्त्तृकारकम् अस्ति। वाक्ये मुख्ये कर्तरि प्रथमा, गौणे कर्तरि च तृतीया विभक्तिः भवति। यथा–

(क) रामः ग्रामं गच्छति।
(ख) रामेण ग्रामः गम्यते।

**कर्मकारकम्** – कर्त्तुरीप्सिततमं कर्म। कर्त्ता स्वक्रियया यम् अर्थम् अतिशयेन प्राप्तुम् इच्छति तत् कर्म भवति। यथा–बालकः विद्यालयं गच्छति। अत्र वाक्ये बालकः कर्त्ता भवति, गमनक्रियया विद्यालयः तस्य ईप्सिततमं वर्तते, अतः विद्यालय इति कर्मकारकं वर्तते, कर्मणि द्वितीया विभक्तिः, (कर्मवाच्ये) मुख्ये च प्रथमा विभक्तिः भवति, यथा–

(क) बालकः विद्यालयं गच्छति।
(ख) बालकेन विद्यालयः गम्यते।

**करणकारकम्** – साधकतमं करणम्। क्रियासिद्धौ यत् अतिशयेन सहायकं भवति, तत् करणं भवति, यथा–श्यामः कलमेन लिखति। अत्र कर्त्तुः श्यामस्य लेखनक्रियायां कलमः अतिशयेन सहायकः, अतः कलम इति करणकारकं भवति। करणे तृतीया-विभक्तिः भवति।

**सम्प्रदानकारकम्** – कर्मणा यमभिप्रैति स सम्प्रदानम्। कर्त्ता दानक्रियया यं सम्बद्धुम् इच्छति, तत् सम्प्रदानं भवति। यथा–देवदत्तः भिक्षुकाय भिक्षां ददाति। अत्र कर्त्ता देवदत्तः

Click on the
Download Link
To view the complete book



दानक्रियया भिक्षुकम् अभिप्रैति = सम्बद्धुम् इच्छति। अतः भिक्षुकपदं सम्प्रदानकारकम्। सम्प्रदाने चतुर्थी-विभक्तिः भवति।

**अपादानकारकम् –** ध्रुवमपायेऽपादानम्। अपाये = विभागे, यत् ध्रुवम् = अवधिभूतम् तत् अपादानं भवति, यथा- वृक्षात् फलं पतति। अत्र फलस्य विभागः वृक्षात् भवति, अतः वृक्षः ध्रुवः इति अपादानकारकम्। अपादाने पञ्चमी-विभक्तिः भवति।

**अधिकरणकारकम् –** आधारोऽधिकरणम्। कर्तृकर्मनिष्ठक्रियायाः आधारभूतं यत् वर्तते, तत् अधिकरणं भवति, यथा- विद्यालये छात्राः पठन्ति। अत्र कर्तुः पठनक्रियायाः आधारः विद्यालयः अधिकरणकारकम्। अधिकरणे सप्तमी-विभक्तिः भवति।

## उपपदविभक्तिः

पदम् आश्रित्य या विभक्तिः सा उपपदविभक्तिः। यथा-

| | | |
|---|---|---|
| **उभयतः** | = | दोनों तरफ (द्वितीया) **नदीम्** उभयतः वृक्षाः सन्ति। |
| **परितः** | = | चारों तरफ (द्वितीया) **विद्यालयं** परितः प्राचीरम् अस्ति। |
| **सर्वतः** | = | सभी तरफ (द्वितीया) **ग्रामं** सर्वतः कृषिक्षेत्राणि सन्ति। |
| **प्रति** | = | की ओर (द्वितीया) छात्रः **विद्यालयं** प्रति गच्छति। |
| **निकषा** | = | समीप में (द्वितीया) **विद्यालयं** निकषा उद्यानम् अस्ति। |
| **धिक्** | = | निन्दा (द्वितीया) **मूर्खं** धिक्। |
| **सह** | = | सहित (तृतीया) बालिका **बालकेन** सह खेलति। |
| **विना** | = | अतिरिक्त (तृतीया/पञ्चमी/द्वितीया) **ज्ञानेन** विना जीवनं वृथा। |
| **अलम्** | = | वारण (तृतीया) **विवादेन** अलम्। |
| | | समर्थ (चतुर्थी) मल्लः **मल्लाय** अलम्। |
| **नमः** | = | नमस्कार (चतुर्थी) **पितृदेवाय** नमः। |
| **बहिः** | = | बाहर (पञ्चमी) **विद्यालयात्** बहिः बालकाः खेलन्ति। |
| **उपरि** | = | ऊपर (षष्ठी) **वृक्षस्य** उपरि मर्कटाः क्रीडन्ति। |
| **अधः** | = | नीचे (षष्ठी) **वृक्षस्य** अधः पथिकः उपविशति। |
| **अन्तः** | = | भीतर (षष्ठी) **विद्यालयस्य** अन्तः छात्राः पठन्ति। |

© NCERT not to be republished

# शब्दरूपाणि

## सर्वनाम-शब्दः

### एतत् (पुँल्लिङ्गे)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | एषः | एतौ | एते |
| द्वितीया | एतम् | एतौ | एतान् |
| तृतीया | एतेन | एताभ्याम् | एतैः |
| चतुर्थी | एतस्मै | एताभ्याम् | एतेभ्यः |
| पञ्चमी | एतस्मात् | एताभ्याम् | एतेभ्यः |
| षष्ठी | एतस्य | एतयोः | एतेषाम् |
| सप्तमी | एतस्मिन् | एतयोः | एतेषु |

### एतत् (स्त्रीलिङ्गे)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | एषा | एते | एताः |
| द्वितीया | एताम् | एते | एताः |
| तृतीया | एतया | एताभ्याम् | एताभिः |
| चतुर्थी | एतस्यै | एताभ्याम् | एताभ्यः |
| पञ्चमी | एतस्याः | एताभ्याम् | एताभ्यः |
| षष्ठी | एतस्याः | एतयोः | एतासाम् |
| सप्तमी | एतस्याम् | एतयोः | एतासु |

### एतत् (नपुंसकलिङ्गे)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | एतत् | एते | एतानि |
| द्वितीया | एतत् | एते | एतानि |



© NCERT not to be republished